✧˖⁺‧₊˚*❋ ❋*˚₊‧⁺˖✧

# શ્રી વેંકટેશ્વર પ્રપત્તિ

# Venkateswara Prapatti

## in gujarati

✧˖⁺‧₊˚*❋ ❋*˚₊‧⁺˖✧

# ॥ શ્રી વેંકટેશ્વર પ્રપત્તિ ॥

ઈશાનાં જગતોડસ્ય વેંકટપતે ર્વિષ્ણોઃ પરાં પ્રેયસીં
તદ્વક્ષઃસ્થલ નિત્યવાસરસિકાં તત્-ક્ષાંતિ સંવર્ધિનીમ્ ।
પદ્માલંકૃત પાણિપલ્લવયુગાં પદ્માસનસ્થાં શ્રિયં
વાત્સલ્યાદિ ગુણોજ્જ્વલાં ભગવતીં વંદે જગન્માતરમ્ ॥

શ્રીમન્ કૃપાજલનિધે કૃતસર્વલોક
સર્વજ્ઞ શક્ત નતવત્સલ સર્વશેષિન્ ।
સ્વામિન્ સુશીલ સુલ ભાશ્રિત પારિજાત
શ્રીવેંકટેશચરણૌ શરણં પ્રપદ્યે ॥ 2 ॥

આનૂપુરાર્ચિત સુજાત સુગંધિ પુષ્પ
સૌરભ્ય સૌરભકરૌ સમસન્નિવેશૌ ।
સૌમ્યૌ સદાનુભનેડપિ નવાનુભાવ્યૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 3 ॥

સદ્યોવિકાસિ સમુદિત્ત્વર સાંદ્રરાગ
સૌરભ્યનિર્ભર સરોરુહ સામ્યવાર્તામ્ ।
સમ્યક્ષુ સાહસપદેષુ વિલેખયંતૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 4 ॥

રેખામય ધ્વજ સુધાકલશાતપત્ર
વજાંકુશાંબુરુહ કલ્પક શંખચક્રૈઃ ।
ભવ્યૈરલંકૃતતલૌ પરતત્ત્વ ચિહ્નૈઃ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 5 ॥

તામ્રોદરદ્યુતિ પરાજિત પદ્મરાગૌ
બાહ્યૈર્-મહોભિ રભિભૂત મહેંદ્રનીલૌ ।
ઉદ્ય ન્નખાંશુભિ રુદસ્ત શશાંક ભાસૌ

શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 6 ॥

સ પ્રેમભીતિ કમલાકર પલ્લવાભ્યાં
સંવાહનેઽપિ સપદિ ક્લમ માધધાનૌ ।
કાંતા નવાઙ્માનસ ગોચર સૌકુમાર્યૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 7 ॥

લક્ષ્મી મહી તદનુરૂપ નિજાનુભાવ
નીકાદિ દિવ્ય મહિષી કરપલ્લવાનામ્ ।
આરુણ્ય સંક્રમણતઃ કિલ સાંદ્રરાગૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 8 ॥

નિત્યાનમદ્વિધિ શિવાદિ કિરીટકોટિ
પ્રત્યુપ્ત દીપ્ત નવરત્નમહઃ પ્રરોહૈઃ ।
નીરાજનાવિધિ મુદાર મુપાદધાનૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 9 ॥

“વિષ્ણોઃ પદે પરમ” ઇત્યુદિત પ્રશંસૌ
યૌ “મધ્વ ઉત્સ” ઇતિ ભોગ્ય તયાઽપ્યુપાત્તૌ ।
ભૂયસ્તથેતિ તવ પાણિતલ પ્રદિષ્ટૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 10 ॥

પાર્થાય તત્-સદૃશ સારધિના ત્વયૈવ
યૌ દર્શિતૌ સ્વચરણૌ શરણં વ્રજેતિ ।
ભૂયોઽપિ મહ્ય મિહ તૌ કરદર્શિતૌ તે
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 11 ॥

મન્મૂર્થ્નિ કાળિયફને વિકટાટવીષુ
શ્રીવેંકટાદ્રિ શિખરે શિરસિ શ્રુતીનામ્ ।
ચિત્તેઽપ્યનન્ય મનસાં સમમાહિતૌ તે
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 12 ॥

અમ્લાન હૃષ્ય દવનીતલ કીર્ણપુષ્પૌ
શ્રીવેંકટાદ્રિ શિખરાભરણાય-માનૌ ।
આનંદિતાખિલ મનો નયનૌ તવૈ તૌ
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 13 ॥

પ્રાયઃ પ્રપન્ન જનતા પ્રથમાવગાહ્યૌ
માતુઃ સ્તનાવિવ શિશો રમૃતાયમાણૌ ।
પ્રાપ્તૌ પરસ્પર તુલા મતુલાંતરૌ તે
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 14 ॥

સત્ત્વોત્તરૈઃ સતત સેવ્યપદાંબુજેન
સંસાર તારક દયાર્દ્ર દૃગંચલેન ।
સૌમ્યોપયંતૃ મુનિના મમ દર્શિતૌ તે
શ્રીવેંકટેશ ચરણૌ શરણં પ્રપદ્યે ॥ 15 ॥

શ્રીશ શ્રિયા ઘટિકયા ત્વદુપાય ભાવે
પ્રાપ્યેત્વયિ સ્વયમુપેય તયા સ્ફુરંત્યા ।
નિત્યાશ્રિતાય નિરવદ્ય ગુણાય તુભ્યં
સ્યાં કિંકરો વૃષગિરીશ ન જાતુ મહ્યમ્ ॥ 16 ॥

**ઇતિ શ્રીવેંકટેશ પ્રપત્તિઃ** |

✧˳·˖✶ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net